# 2022

## 3rd Semester Examination

## SANSKRIT (Honours)

### Paper : C 5-T

### [Classical Sanskrit Literature (Drama)]

Debra Thana S.K.S. CENTRAL LIBRARY Estd.-2006 Chakshyampur, Paschim M

[CBCS]

Marks : 60 Time : 3 Hours

*The figures in the margin indicate full marks. Candidates are required to give their answers in their own words as far as practicable.*

अधोलिखितेषु देवनागर्या संस्कृतभाषया च पूर्णवाक्येन दश प्रश्नाः समाधेयाः ।

2×10=20

(क) "आश्रममृगोऽयं न हन्तव्यः न हन्तव्यः" — कः कमुद्दिश्य उक्तवान् ?

(ख) किं नाम रूपकम् ? तच्च कतिविधम् ?

(ग) स्वप्नवासवदत्तनाटके नायकः कः विद्यते ? एषः नायकः कीदृशो वर्तते ?

(घ) "भवतु, सुपरिपालनीयः खलु मन्न्यासः" — का उक्तवती ? कस्मिन् प्रसङ्गे सा एवम् उक्तवती ?

(ङ) "विचिन्तयन्ती यमनन्यमानसा
तपोधनं वेत्सि न मामुपस्थितम्।" — कः कथम् उक्तवान्?

(च) 'वेणीसंहारम्' — इति दृश्यकाव्यम् केन विरचितम्? कति अङ्काः सन्ति?

(छ) 'मृच्छकटिकम्' कीदृशं दृश्यकाव्यम्? कति अङ्काः चात्र सन्ति?

(ज) 'मुद्राराक्षसम्' — इति नाटकस्य मुख्यरसः कोऽस्ति?

(झ) घोषवती का?

(ञ) स्वप्नवासवदत्तमिति नाटकस्य कश्मिन् अङ्के ब्रह्मचारी अवतीर्णः कुतः स आयातः?

(ट) 'मृच्छकटिकम्' इत्यस्य व्युत्पत्तिः का?

(ठ) शकुन्तलायाः सखिद्वयस्य नाम किम्?

(ड) श्रीहर्षेण कति रूपकाणि रचितानि कानि च तानि?

(ढ) प्रतिमा-नाटकं केन विरचितम्? तत्र प्रतिमा-शब्दस्य कोऽर्थः?

(ण) वसन्तसेना का?

यथानिर्देशं चत्वारः समाधेयाः। 5×4=20

(क) सुखमर्थो भवेद् दातुं सुखं प्राणाः सुखं तपः।
सुखमन्यद् भवेत् सर्वं दुःखं न्यासस्य रक्षणम्।
— व्याख्यायताम्।



(ख) अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः!
जातो ममायं विशदः प्रकामं
प्रत्यार्पितन्यास इवान्तरात्मा।।
— व्याख्यायताम्।

(ग) भवितव्यानां द्वाराणि भवन्ति सर्वत्र — भावसम्प्रसारणं कार्यम्।

(घ) नीयते वालिशस्यापि सत्क्षेत्रपतिता कृषिः।
न शालेः स्तम्वकरिता वप्तुर्गुणमपेक्षते।।
—भावसम्प्रसारणं कार्यम्

(ङ) नाट्यकाररुपेण विशाखदत्तस्य वैशिष्ट्यं रचनाशैली वा आलोच्यताम्।

(च) भवभूतेः नाट्यसाहित्यानां परिचयः संक्षेपेण प्रदीयताम्।

3. अधोलिखितेषु क्योश्चिद् **द्वयोः** उत्तरं प्रदेयम्। 10×2=20

(क) 'स्वप्नवासवदत्तम्'—इति नाटकस्य अन्तिमाङ्के प्राप्तं मिलनदृश्यं वर्ण्यताम्।

(ख) 'अभिज्ञानशकुन्तलम्' — इति नाटकस्य शकुन्तलायाः पतिगृहे यात्रा इति दृश्यं वर्ण्यताम्।

(ग) भाससमस्या का? विषयेऽस्मिन् संक्षिप्ता टीका लिख्यताम्।

(घ) कालिदासस्य नाट्यकृतीनां परिचयः प्रदीयताम् संक्षेपेण।